श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे नवमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे नवमोऽध्यायः ॥

श्रीशुक उवाच
अथ कस्यचिद् द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपः -
स्वाध्यायाध्ययनत्यागसन्तोषतितिक्षाप्रश्रयविद्या -
नसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचार -
रूपौदार्यगुणा नव सोदर्या अङ्गजा बभूवुर्मिथुनं च
यवीयस्यां भार्यायाम् ॥ 1 ॥

यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं
भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं
गतमाहुः ॥ 2 ॥

तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः
कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरण -
चरणारविन्दयुगलं मनसा विदधदात्मनः
प्रतिघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृत -
स्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिर -
स्वरूपेण दर्शयामास लोकस्य ॥ 3 ॥

तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना
आ समावर्तनात्संस्कारान् यथोपदेशं विदधान

उपनीतस्य च पुनः शौचाचमनादीन् कर्मनियमा -
ननभिप्रेतानपि समशिक्षयदनुशिष्टेन हि भाव्यं
पितुः पुत्रेणेति ॥ 4 ॥

स चापि तदु ह पितृसन्निधावेवासध्रीचीनमिव
स्म करोति छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः
सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिका -
न्मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥ 5 ॥

एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः
शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौप -
कुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन
भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं
तावदनधिगतमनोरथः कालेनाप्रमत्तेन
स्वयं गृह एव प्रमत्त उपसंहृतः ॥ 6 ॥

अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं
सपत्न्या उपन्यस्य स्वयमनुसंस्थयापतिलोकमगात् ॥ 7 ॥

पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां
विद्यायामेव पर्यवसितमतयो न परविद्यायां
जडमतिरिति भ्रातुरनुशासननिर्बन्धान्न्यवृत्सन्त ॥ 8 ॥

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरे -
त्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि
च स कार्यमाणः परेच्छया करोति विष्टितो वेतनतो
वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मृष्टं
कदन्नं वाभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम्।
नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्द -

स्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयो -
रसम्भावितदेहाभिमानः ॥ 9 ॥

शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः
संहननाङ्गः स्थण्डिलसंवेशनानुन्मर्दनामज्जन -
रजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटा -
वृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्म -
बन्धुरिति संज्ञयातज्ज्ञजनावमतो विचचार ॥ 10 ॥

यदा तु परत आहारं कर्मवेतनत ईहमानः
स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि
करोति किन्तु न समं विषमं न्यूनमधिकमिति
वेद कणपिण्याकफलीकरणकुल्माषस्थाली -
पुरीषादीन्यप्यमृतवदभ्यवहरति ॥ 11 ॥

अथ कदाचित्कश्चिद् वृषलपतिर्भद्रकाल्यै
पुरुषपशुमालभतापत्यकामः ॥ 12 ॥

तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः
परिधावन्तो निशि निशीथसमये तमसा -
ऽऽवृतायामनधिगतपशव आकस्मिकेन विधिना
केदारान् वीरासनेन मृगवराहादिभ्यः
संरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ॥ 13 ॥

अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्म -
निष्पत्तिं मन्यमाना बद्ध्वा रशनया चण्डिका -
गृहमुपनिन्युर्मुदा विकसितवदनाः ॥ 14 ॥

अथ पणयस्तं स्वविधिनाभिषिच्याहतेन
वाससाऽऽच्छाद्य भूषणालेपस्रक्तिलकादिभि -

रुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाज -
किसलयाङ्कुरफलोपहारोपेतया वैशस -
संस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण
च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥ **15** ॥

अथ वृषलराजपणिः पुरुषपशोरसृगासवेन
देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसि -
मतिकरालनिशितमुपाददे ॥ **16** ॥

इति तेषां वृषलानां रजस्तमःप्रकृतीनां
धनमदरज उत्सिक्तमनसां भगवत्कला -
वीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां
हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य
साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूत -
सुहृदः सूनायामप्यननुमतमालभ्भनं तदुपलभ्य
ब्रह्मतेजसातिदुर्विषहेण दन्दह्यमानेन वपुषा
सहसोच्चचाट सैव देवी भद्रकाली ॥ **17** ॥

भृशममर्षरोषावेशरभसविलसितभ्रुकुटि -
विटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानक -
वदना हन्तुकामेवेदं महाट्टहासमतिसंरम्भेण
विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां
तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवन्तम -
सृगासवमत्युष्णं सह गणेन निपीयातिपानमद -
विह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ
ननर्त च विजहार च शिरःकन्दुकलीलया ॥ **18** ॥

एवमेव खलु महदभिचारातिक्रमः
कार्त्स्न्येनात्मने फलति ॥ **19** ॥

**न वा एतद्विष्णुदत्त महदद्भुतं यदसम्भ्रमः**
**स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभाव -**
**सुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां**
**निर्वैराणां साक्षाद्भगवतानिमिषारिवरायुधेना -**
**प्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां**
**तत्पादमूलमकुतश्चिद्भयमुपसृतानां**
**भागवतपरमहंसानाम् ॥ 20 ॥**

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे जडभरतचरिते नवमोऽध्यायः ॥